बधो भवेद् यः । तस्यैव मूलं खलु कर्म्मतोऽस्य आयुर्विधाने गुणकार उक्तः । ग्रहस्य लिप्ताः खखसिद्ध २४०० भक्ताः प्रोक्ताः कलाः शेषमिहायुषोऽत्र । लग्नं ग्रहोनं यदि षड्गृहेभ्यो हीनं तदानीं हरसंभवः स्यात् । नैवाधिके तत्र खगोनलग्ने लिप्तीकृते राशिकला १८०० विभक्ते । आयुःकलानां स हरः स्फुटः स्यात् रूपाद्यदाल्पः सहरस्तदानीम् । रूपादिशुद्धोगुणकस्तु तासामेवं हि पापद्युचरोनलग्ने । शुभोनलग्ने तु हरोद्विनिघ्न आयुः कलाभ्योहरलब्धलिप्ताः । विशोधनीया यदि रूपकोनोहरस्तदानीं गुणकेन गुण्यः । चक्रार्द्धहानौ बहुषु द्वयोर्वा द्युचारिणोरेकगृहस्थयोस्तु । सत्याभिधानस्य मतेन सत्यं स्वांशं हरत्येव बलोत्कटोयः । एवं कार्य्या चक्रपातार्द्धहानिरायुर्दाये ह्यंशजे पिण्डजे च” इत्यंशायुः “नैसर्गाख्ये जीवशर्म्मोदिते च हारं कृत्वात्वेककोनोगुणः स्यात्” निसर्गायुषिविशेषः । “आयुर्लिप्ताः स्वगुणगुणिता व्योमशून्याश्वि २०० भक्ता अब्दामासादिवसघटिकाः स्युर्विनाड्यः क्रमेण” “एवं यथायथं गुणकगुणिता आयुर्लिप्ताः २०० भक्ता अब्दा भवन्ति शेषं विकला द्वादशभिर्गुणयित्वा षष्ट्या विभज्य लब्धं कलासु संयोज्य पुनरपि ताः कला द्विशत्या विभजेत् तेन मासा भवन्ति । पुनःशेषं त्रिंशता गुणयित्वा कलासु संयोज्य द्विशत्या भागे दिवसा भवन्ति पुनःशेषं षष्ट्यागुणय कलासु संयोज्य द्विशत्या विभज्य लब्धं घटिका भवन्ति । एवं पलानि च” । “एवं सर्वं द्युचरजनितं ह्यायुरनीय लग्नादायुः साध्यं कथितविधिना किन्तु लग्ने विशेषः” ।‘‘एवं द्युगणजनितमिति रव्यादिग्रहसूचितं तेन तत्तद्ग्रहदत्तायुरुच्यते इत्यर्थः” । ‘लग्ने तु वीर्य्याभ्यधिके भतुल्यैर्वर्षैर्युतं तत्र विधेयमायुः । भागादिकादप्यनुपातलब्धं मासादिना संयुतमेव कार्य्यम्” वीर्य्याधिके षडधिके इत्यर्थः । अनुपातस्तु लग्नभागादि द्विगुणं कृत्वा पञ्चभिर्भक्ता लब्धं मासाः शेषं त्रिंशतागुणय पञ्चभिर्भक्तं लब्धं दिनानि शेषं षष्ट्यागुणय पञ्चभिर्भक्ता लब्धं घटिका एवं पलादिकमुन्नेयम् । एवं लग्नायुः” अथ रव्यादीनां पिण्डायुः । “नन्देन्दवो १९ वाणयमाः २५ शरज्मा १५ दिवाकराः १२ पञ्चभुवः १५ कुपक्षाः २१ । नखाश्च २० भास्वत्प्रमुखग्रहाणां पिण्डायुषोऽब्दा निजतुङ्गगानाम् । निजोच्चशुद्धः खचरोविशोध्योभमण्डलात् षड्भवनोनकश्चेत् । यथा स्थितः षड्भवनाधिकस्तु लिप्तीकृतः संगुणितो निजाब्दैः ।

तत्र खाभ्ररसचन्द्रविलोकै २१६०० हृते सति यदाप्यते फलम् । वर्षमासदिननाड़िकाद्यं तद्धि पिण्डभवमायुरिष्यते” इति पिण्डायुः । “त्र्यंशशुक्रं हरति शत्रुभे ग्रहः स्वायुषोऽत्र न तु वक्रचारगः । सूर्य्यलुप्तकिरणोऽर्द्धहारकः प्रोज्झ्य भार्गवदिनेशनन्दनौ । खचरोजायते योऽर्द्धत्र्यंशयोरपहारकः । आयुषः स हरेदर्द्धं त्र्यंशं शुक्रशनैश्चरौ । प्राग्वत्फलानि स्वहरैर्विधाय तदैक्यतो यत्ग्रहसंख्ययाप्तम् । तदत्र ह्रासं बलिनो ग्रहस्य जगौ मणित्थोहरिरित्यमेव । हरयुतिविहृताग्रहसंख्यया स च हरोपचयस्य ततः फलम् । अधिकवीर्यवतोऽम्बरचारिणो निगदतीति मुनिः किल देवलः । लिप्तीभूतैर्लग्नभागैर्निहन्यादादायुर्दायं खेचराणां पृथक्स्थम् । व्योमाकाशर्त्विन्दुपक्षैः २१६००र्भजेत्तं स्वायुर्दायात् शोध्यमब्दादि लब्धम् । एवं क्रूरे लग्नगे सौम्यदृष्टे तस्मिन्दाये तत्फलार्द्धं विशोध्यम् । एतद्दाये नांशसंज्ञे विधेयं पिण्डायुर्वत् कर्म नैसर्गिकेऽपि, अत्र विशेषो लघुपद्धतौ । “लग्ने चेदशुभस्तदोदयगृहात् हित्वांशनिघ्नं फलं क्रूरस्योदयभावजं यदि तनौ द्वौ तद्बलिष्ठस्य च । चेत् साम्येऽधिकभावजेन बलयोस्तेन ग्रहायुः कला निघ्नाः खाभ्ररसेन्दुदस्र २१६००विहृता लब्धं त्यजेत् स्वायुषः” । लग्नगपापस्य लग्ने सत्त्वे तु न त्यागः “योयो भावः स्वामिदृष्टो युतो वेत्यादिना” तस्य पुष्टत्वाभिधनात्, “क्रूरःसोऽपि शुभेक्षितो यदि तदा लब्धस्य खण्डं त्यजेत् नैतत् कर्म्म विलग्नपे तनुगते क्रूरेऽपि नांशायुषीत्युक्तेश्च” ग्रहाणां बलं च बलशब्दे वक्ष्यते । नखाः २० शशी १ द्वौ २ नवकं ९ धृतिश्च १८ कृतिः २० खवाणा ५० रविपूर्वकाणाम् इयं निरुक्ताक्रमशोग्रहाणां नैसर्गिके ह्यायुषि वर्षसंख्या” । इति नैसर्गिग्रहदत्तायुः इदानीमंशायुःप्रभृतीनां कस्य कुत्र ग्राह्यता तदाह । “अंशोद्भवं लग्नबलात् प्रसाध्यमायुश्च पिण्डोद्भवमर्कवीर्य्यात् । नैसर्गिकं चन्द्रमसोबलेन ब्रूमस्त्रयाणामथ वीर्य्यसाम्ये । अंशोद्भवं लग्नबलेन हन्यात् पिण्डाख्यमायुश्च बलेन भानोः । नैसर्गिकं चन्द्रमसो बलेन सर्वांशयथैकत्र विधाय तानि । विलग्नतिग्मांशुहिमद्युतीनां हरेद्बलैक्येन ततो यदाप्तम् । वर्षाद्यमायुस्तदिह स्फुटं स्यात् श्रीनीलकण्ठादय एवमूचुः । लग्नसूर्यशशिनोबलशून्याः स्युर्यदात्र परमायुरगांशम्” हीनबलत्वमाह दामोदरः रूपत्रयाल्पं किल षड्बलैक्यं भवेद्विलग्नस्य खगस्य यस्य । स्वस्वामिना नो सहितो न दृष्टः स हीनवीर्य्यः कथितो-